दिनाङ्क :- 23.05.2025 प्रातः - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-सम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् उदीयमानं पूर्वोत्तर-निवेशक-शिखरसम्मेलनम् उद्घाटयिष्यति। द्विदिवसात्मकस्य अस्य शिखरसम्मेलनस्य उद्देश्यं पूर्वोत्तरक्षेत्राणाम् अवसराणां भूमिरूपेण उन्नतिकरणमिति तथा च दैशिक-वैश्विकयोः निवेशस्य कृते आकर्षणप्रदानमिति वर्तते। एतस्मिन् शिखर-सम्मेलने मन्त्रिस्तरीयाणि सत्राणि व्यवसायतः प्रशासनं यावत् सम्बद्धानिसत्राणि राज्यप्रशासन-केन्द्रीय-मन्त्रालयाभ्याम् आयोक्ष्यमाणानि उपवेशनानि प्रदर्शनानि च सम्मिलितानि सन्ति। द्विदिवसात्मके एतस्मिन् सम्मेलने विभिन्नानां पूर्व-शिखर-सम्मेलन-गतिविधिनाम् अन्तिमा परिणतिः भविष्यति।

### प्रधानमन्त्री-बीकानेर

प्रधानमन्त्री नरेन्द्रमोदी ह्यः अवदत् यत् भारतम् सिन्दूराभियानस्य अन्तर्गतम् आतङ्कवादीनां गुप्तस्थानानि नाशयित्वा पाकिस्तानदेशाय पर्याप्तं प्रत्युत्तरम् अददात् इति। असौ अघोषयत् यत् प्रशासनं सशस्त्रसेनायै कार्यस्वातन्त्र्यं दत्तवान् इति, येन तिसृणां सेवानां सामरिक-परिवेष्टनं कर्तुं शक्यते स्म, येन पाकिस्तानं शरणागन्तुं बाध्यम् अभवत् इति।

### बाइट-पीएम मोदी ऑन सिंदूर

श्रीमोदी राजस्थानस्य बीकानेरस्थले एकां जनसभां सम्बोधयन् इमां वार्तां कथितवान्। इतः पूर्वं बीकानेरस्थलस्य पलानाइत्यत्र आयोजितायां जनसभायाम् प्रधानमन्त्री नरेन्द्रमोदी भूयोऽपि षड्विंशति-सहस्र-कोटि-रूप्यकाणां विकासात्मक-परियोजनाः राष्ट्राय समर्पितवान्। अत्रावधौ प्रधानमन्त्री अष्टादशराज्यानां केन्द्रशासितप्रदेशानाञ्च षडशीतिजनपदेषु प्रसृतानाम् त्र्यधिकैकशतं पुनर्विकसितामृतस्थानकानामपि उद्घाटनं कृतवान्। अत्रान्तरे प्रधानमन्त्री बीकानेर-मुम्बई-एक्सप्रेस-रेलयानायापि हरितध्वजं प्रदर्शितवान्।

### जयशङ्करः

विदेशमन्त्री डॉ. एस्. जयशङ्करः ह्यः बर्लिननगरे यूरोपमहाद्वीपे भारतीय-राजदूतानां क्षेत्रीय-सम्मेलनस्य अध्यक्षतां कृतवान्। एकस्मिन् सामाजिकसन्देशपटले डॉ. जयशङ्करः अलिखत् यत् सम्मेलनावधौ सिन्दूराभियाने अथ च आतङ्कवादं प्रति भारतस्य शून्य-सहिष्णुतायाः सन्देशे चर्चा सम्पादिता। असौ परिवर्तमानसमये यूरोपेन सह गहनतया विविधेषु पक्षेषु विचारविमर्शोऽपि जातः।

### फिच-रेटिङ्ग

वैश्विक-रेटिंग-एजेंसी फिचरेटिंग्स इत्यनेन आगामिषु पञ्चवर्षेषु भारतस्य सकलगृहोत्पादवृद्धिमानं शून्यं दशमलव द्वे प्रतिशततः अपचीय षट्दशमलव चत्वरिप्रतिशतं यावत् कृतमस्ति। अयं पदक्षेपः साम्प्रतिकेषु वर्षेषु देशस्य श्रमशक्ति-सहभागित्वमाने तीव्रवृद्धेरनन्तरं समुत्थापितः। फिच इत्यनेन प्रकाशितं यत् भारतीयसंशोधितानुमानम् श्रमनिवेशः मुख्यतया समग्र-वृत्यवसरादधिकं योगदानं दर्शयति।

**ब्रिटेन-चागोस्-महाद्वीप:**

डियेगो गार्सिया- इत्येतं समेत्य चागोस्-द्वीपसमूहस्य उपरि मॉरिशसदेशीय -सार्वभौमत्वस्य पुनरागमनस्य विषये ब्रिटेन-मॉरीशस-देशयोः मध्ये जातस्य सन्धिहस्ताक्षरस्य भारतं स्वागतम् अकरोत्। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् अस्य द्वैपाक्षिक-सन्धिद्वारा चागोस् इत्यस्य दीर्घकालस्य विवादस्य औपचारिक-निराकरणं ऐतिहासिकोपलब्धिः अस्ति, क्षेत्रस्य कृते सकारात्मक-विकासः च अस्ति इति। पूर्ववर्षस्य अक्टोबर्-मासे उभयोः पक्षयोः मध्ये प्राप्तसमन्वयस्य विषये एतत् एकम् अग्रगमनम् अस्ति, तथा च अन्ताराष्ट्रियविधेः आधारेण व्यवस्थायाः च भावेन मारिषस्-देशस्य उपनिवेशीकरणस्य प्रक्रियायाः पराकाष्ठां सूचयति।

**आई.पी.एल्.-क्रिकेट**

आई.पी.एल्. इत्येतस्यां क्रिकेट- स्पर्धामालिकायां ह्यः रात्रौ अहमदाबाद-नगरे नरेन्द्रमोदीक्रीडाङ्गणे लखनऊ-सुपर-जायन्ट्स-दलेन गुजरात-टाइटन्स-दलम् त्रयस्त्रिंशत्धावनाङ्कैः पराभूतम्। अपरत्र अद्य लखनऊनगरे भारत-रत्न-श्री-अटल-बिहारी-वाजपेयी-एकाना-क्रिकेट्-क्रीडाङ्गणे रॉयल-चैलेन्जर्स-बेङ्गलुरु-सनराइजर्स-हैदराबाददलयोर्मध्ये सायंकाले सार्धसप्तवादने क्रीडा भविष्यति।

।। **इति वार्ता:**।।